# Rishikashyapaproktam Shambhavalakshanam

# ઋષિકશ્યપપ્રોક્તં શામ્ભવલક્ષણમ્

## Document Information

Text title : Rishikashyapaproktam Shambhavalakshanam

File name : RRiShikashyapaproktaMshAmbhavalakShaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 16 | 10-50,53||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# ઋષિકશ્યપપ્રોક્તં શામ્ભવલક્ષણમ્

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

કાશ્યપ ઉવાચ ।

તે શામ્ભવાઃ સદા જ્ઞેયાઃ શિવસ્યૈવ પ્રસાદિનઃ ।
નૈવેદ્યં યે શિવે દદ્યુર્ભુઞ્જ્યુર્વા શઙ્કરાર્પિતમ્ ॥ ૧૦॥

તે શામ્ભવાઃ સદા જ્ઞેયાઃ શિવસ્યૈવ પ્રસાદિનઃ ।
યે ધારયન્તિ ચિહ્નાનિ દેવદેવસ્ય શૂલિનઃ ॥ ૧૧॥

તે શામ્ભવાઃ સદા જ્ઞેયાઃ શિવસ્યૈવ પ્રસાદિનઃ ।
યે ધારયન્તિ રુદ્રાક્ષાન્ત્સદા વૈ શાઙ્કરોત્તમાઃ ॥ ૧૨॥

તે શામ્ભવાઃ સદા જ્ઞેયાઃ શિવસ્યૈવ પ્રસાદિનઃ ।
યે રુદ્રાધ્યાયજપ્યેન જપન્તિ શિવતુષ્ટયે ॥ ૧૩॥

તે શામ્ભવાઃ સદા જ્ઞેયાઃ શિવસ્યૈવ પ્રસાદિનઃ ।
યે રુદ્રૈઃ સ્વાત્મકૈર્નિત્યમભિષેક્ષ્યન્તિ શઙ્કરમ્ ॥ ૧૪॥

તે શામ્ભવાઃ સદા જ્ઞેયાઃ શિવસ્યૈવ પ્રસાદિનઃ ।
યે પઞ્ચાક્ષરાસક્તા તેન યે પૂજયન્તિ તે ॥ ૧૫॥

તે શામ્ભવાઃ સદા જ્ઞેયાઃ શિવસ્યૈવ પ્રસાદિનઃ ।
યે વૈ બિલ્વાર્ચનપ્રીતા યે વૈ બિલ્વાર્ચનપ્રિયાઃ ॥ ૧૬॥

તે શામ્ભવાઃ સદા જ્ઞેયાઃ શિવસ્યૈવ પ્રસાદિનઃ ।
બિલ્વપત્રાર્ચકા યે વૈ ત્રિકાલં લિઙ્ગમસ્તકે ॥ ૧૭॥

તે શામ્ભવાઃ સદા જ્ઞેયાઃ શિવસ્યૈવ પ્રસાદિનઃ ।
યે લિઙ્ગાર્ચનવ્યગ્રા અગ્રા ઉગ્રાર્ચને રતાઃ ॥ ૧૮॥

તે શામ્ભવાઃ સદા જ્ઞેયાઃ શિવસ્યૈવ પ્રસાદિનઃ ।
યે પઞ્ચગવ્યૈર્નિયતાસ્ત્રિકાલમભિષેચકાઃ ॥ ૧૯॥

તે શામ્ભવાઃ સદા જ્ઞેયાઃ શિવસ્યૈવ પ્રસાદિનઃ ।
ફલજાલરસૈઃ શમ્ભોરભિષેકકરાઃ સદા ॥ ૨૦॥

તે શામ્ભવાઃ સદા જ્ઞેયાઃ શિવસ્યૈવ પ્રસાદિનઃ ।
પાટીરાગરુકસ્તૂરીચન્દ્રચન્દનલેપકાઃ ॥ ૨૧॥

શમ્ભોર્લિઙ્ગે સદા તુઙ્ગે હ્યસઙ્ગાઃ સઙ્ગતત્પરાઃ ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૨૨॥

બિલ્વપત્રામ્બુજવરૈઃ કરવીરાર્કચમ્પકૈઃ ।
મન્દાર પારિજાતાદિમાલાપુષ્પપ્રદા હિ યે ॥ ૨૩॥

શમ્ભોર્લિઙ્ગે વિશેષેણ ત્રિકાલં ચ પ્રદોષકે ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૨૪॥

દિવ્યવસ્ત્રપ્રદાતારો મહેશાય સમુત્સદા ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૨૫॥

યે શમ્ભો રત્નપુષ્પપ્રદાતારો વિશેષતઃ ।
શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૨૬॥

સુવર્ણરત્નપુષ્પાદ્યૈર્બિલ્વપત્રાર્ચકા હિ યે ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૨૭॥

યે કૃષ્ણાગરુસામ્રાણિગુગ્ગુલૈર્ધૂપદાયિનઃ ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૨૮॥

ઘૃતતૈલમહાદીપં યે દદ્યુઃ શ્રીશિવાલયે ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૨૯॥

યે નૈવેદ્યપ્રદાતારો ભક્ષ્યભોજ્યાદિભિર્મુને ।
યે તામ્બૂલપ્રદાતારો હ્યહર્નિશમુમાપતેઃ ॥ ૩૦॥

તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ।
યે છત્રવૃન્દદાતારઃ સર્વદા શિવમસ્તકે ॥ ૩૧॥

તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ।
યે વૈ ચામરદાતારો હંસ પાણ્ડરમુત્તમમ્ ॥ ૩૨॥

યે પતાકાપ્રદાતારઃ સર્વદા યે શિવાગ્રતઃ ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૩૩॥

યે ચાદર્શપ્રદાતારો મહાદેવાગ્રતઃ સદા ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૩૪॥

યે મૃદઙ્ગમહાવીણાદુન્દુભીવાદને રતાઃ ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૩૫॥

તૌર્યત્રિકાદિકર્તારો નૃત્તં સ્ત્રીણાં પ્રદાયકાઃ ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૩૬॥

યે શિવાલયકર્તારઃ પ્રકારવરગોપુરમ્ ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૩૭॥

યે શિવારામકર્તારઃ સર્વપુષ્પોપશોભિતમ્ ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૩૮॥

યે રથોત્સવકર્તારો વૃષવાહનમુત્તમમ્ ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૩૯॥

યે શામ્ભવાન્નદાતારો યતીનામપિ વા પુનઃ ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૪૦॥

યે પ્રદોષાર્ચનરતાઃ સર્વપૂજાભરૈઃ શિવે ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૪૧॥

યે સોમવાસરે સાયં શિવલિઙ્ગાર્ચને રતાઃ ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૪૨॥

અષ્ટમ્યામષ્ટમૂર્તિં યે પૂજયિષ્યન્તિ ભક્તિતઃ ।
તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ॥ ૪૩॥

યે ભૂતાયાં ભૂતનાથમર્ચયન્તિ દૃઢવ્રતાઃ ।
યે પર્વણ્યપિ વાભ્યર્ચ્ય શર્વરીનાથધારિણમ્ ॥ ૪૪॥

તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ।
યે નામનિરતાઃ શમ્ભોઃ સર્વદા રસનોજ્જ્વલાઃ ॥ ૪૫॥

તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ।
યે ભક્તાર્ચનતસ્તુષ્ટાઃ સર્વવર્ણેષ્વપિ ધ્રુવમ્ ॥ ૪૬॥

મહેશસ્ય વિશેષેણ શામ્ભવાગ્રેસરા હિ તે ।

યેઽર્ચયન્તિ મહાદેવં ત્રિવારં ભસ્મધારિણઃ ॥ ૪૭॥

તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ।
યે ક્ષેત્રનિરતાઃ શમ્ભોર્વિરક્તા વિષયેષ્વપિ ॥ ૪૮॥

તે શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ ।
યે રુદ્રાધ્યાયનિરતાઃ સદા પઞ્ચાક્ષરાદરાઃ ॥ ૪૯॥

શામ્ભવાઃ મહાદેવપ્રિયા નાસ્ત્યત્ર સંશયઃ
યેઽથર્વણશિખાજાપ્યનિરતા વેદપારગાઃ ॥ ૫૦॥

યે શામ્ભવાઃ શશિકલાશકલોત્તમાઙ્ગ-
લિઙ્ગોત્તમાઙ્ગમનવદ્યસુચન્દનાદ્યૈઃ ।
સમ્પૂજયન્તિ કિલ પાપમતઙ્ગભઙ્ગાઃ
શાન્તાસ્ત્વસઙ્ગહૃદયાઃ શિવલિઙ્ગસઙ્ગાઃ ॥ ૫૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિકશ્યપપ્રોક્તં શામ્ભવલક્ષણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૧૬ । ૧૦-૫૦,૫૩॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 16 . 10-50,53..

Notes:
Ṛṣi Kaśyapa ઋષિ કશ્યપ speaks about indicators and significations of Śāmbhavāḥ શામ્ભવાઃ - the of worshippers of Śambhu શમ્ભુ. Further description of the same is continued in Chapter 17.

Proofread by Ruma Dewan

*Rishikashyapaproktam Shambhavalakshanam*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*